श्रीमते रामानुजाय नमः

श्रीमते रामानुजाय नमः

श्रीमद् वरवर मुनये नमः

श्रीमद् वानमहाचल गुरुभ्यो नमः

॥ श्री तोताद्रिनाथ स्तोत्रम्॥

कमलाधरणीसुरलोकवधू विधिसूर्यचमूपतिशेषपते।
विहगाधिपरोमशयोगिपते भृगुयोगिमृकण्डुसुताधिपते॥ १

शटजित्कलिजित्गुरुजित्यतिराट् वरयोगिवरप्रदयोगिपते।
शरणागतवत्सलसाधुपते परिपालय मां वियदद्रिपते॥ २

बहुजन्मकृतैरपराधगणैः परिपूर्णजनावनदक्ष हरे।
वरपङ्कसरोरुहपुष्करिणी तटवाससमुत्सुक पाहि सदा॥ ३

शटवैरिगुरूत्तमदिव्यसुधा मयसूक्तिमुखैर्मुदितश्रवणात्।
वियदद्रियतीन्द्रगुरुप्रथित स्तुतदेवपतेर्नपरं कलये॥ ४

चिरजीविमृकण्डुसुताधिपते वरकोलसमुद्धृतभूमिपते।
भृगुसेवितकृष्णरमाधिपते वरदो भव वाननगाधिपते॥ ५

विनाव्योमशैलं न नाथो न नाथः सदा देवनाथं स्मरामि स्मरामि।
रमानाथ नित्यं प्रसीद प्रसीद प्रियं भक्तपाल प्रयच्छ प्रयच्छ॥ ६

कादारितदैत्यबकास्यभजे यमुकार्जुनमध्यगते नृहरे।
ललनासुखलाभविनष्टवृष प्रथदैत्यकसप्त सुराधिपते॥ ७

श्रीमते रामानुजाय नमः

पाञ्चजन्यधारिणे प्रयोगचक्रधारिणे भक्तबृन्दरक्षणैकभोग्यसद्गुणात्मने।
शत्रुसङ्घ भञ्चनैकलीलया विराजते व्योमशैलनायकाय सन्ततम् नमोस्तुते॥ ८

युष्मत्तैलाभिषेकात् शटरिपुजननं कारिराजः स्वपल्यां तस्मात्सर्वैः प्रपन्नैः अहरहरधुना तैलधाराभिशेकः।
प्रेम्णानुष्ठीयते हो वियदगनगरे देवतासार्वभौम श्रीमत्तोताद्रिनाथाखिलजनहृदये मोदमार्धयस्व॥ ९

यत्करोमि यद्शनामि यद्वदामि ददामि यत्।
यत्तपस्यामि तोताद्रे तत्करोमि त्वदर्पणं॥ १०

सर्वधर्मान् परित्यज्य त्वद्पादकमलं श्रये।
त्वा मां प्रपन्नं तोताद्रे नन्दयाघविमोचनैः॥ ११

पद्मया वसुदया शठारिणा भव्यरूपवरमङ्गयोज्वल।
भट्टनाथसुतयाञ्चितप्रभो देवदेव कृपयैव पाहि मां॥ १२

विजयीभव विजयीभव वियद्द्रिपुरेस्मिन् विजयीभव विजयीभव वरमङ्गलधाम्नि।
विजयीभव विजयीभव विजयप्रदमूर्ते विजयीभव विजयीभव शठवैरिशरण्य॥ १३

स्वयम्व्यक्तविख्याततोताद्रिदेशे वियत्पर्वते पाञ्चरात्रोपदेष्टा।
वैखानसाराधितदिव्यमूर्तिः शठारिगीतैरिह भासि नित्यं॥ १४

तोदाद्रिनाथ कमलारमणाहिभोगे वैकुण्ठनामविमानविराजमान्।
श्रीगालवाख्यमुनिशापविमोचनेन भूम्यां प्रसिद्धशुभतीर्थतटे निवासिन्॥ १५

तोदनात्सर्वपापानां तोताद्रिरिति गीयसे।
तस्मात्वं सर्वपापेभ्यो मोक्षयासु वियद्गिरे॥ १६

श्रीमते रामानुजाय नमः

उपचारापदेशेन कृतस्तोत्रलसत्कवौ।
विध्यमानापचाराम्श्च क्षमस्व गगनाचल॥ १७

मङ्गलाशासनपरैः मदाचार्यपुरोगमैः।
सर्वैश्चपूर्वैराचार्यैः स्तुतदेवपतिम् भजे॥ १८

शठकोपार्यविदुषा जगन्नाथार्यसूनुना।
स्तुता तोताद्रिनाथस्य स्तुतिर्मुक्तः सुगीयताम्॥

॥ श्री तोताद्रिनाथ स्तोत्रं समाप्तं॥